# संस्कृत वार्ता:

दिनाङ्क :- 08.07.2026 प्रात: - 06:55

## अथ वार्ताः

### पीएम् मोदी - इण्डोनेशिया

भारत-इण्डोनेशिया-रणनीतिक-सहभागित्वस्य सुदृढाह्वानं कुर्वन्, प्रधानमन्त्री मोदी अवदत् यत् एतत् न केवलं द्वयोः देशयोः समृद्धौ, अपितु क्षेत्रीय-वैश्विक-शान्ति-स्थिरतासु च योगदानं प्रदास्यति इति। जकार्ता इत्यत्र इण्डोनेशिया-देशस्य संसदं सम्बोधयन् श्रीमोदी अवदत् यत् भारतं विकासस्य मार्गम् अनुसरति, न तु विस्तारवादस्य।

श्रीमोदी द्वयोः देशयोः जनानां लाभाय यूपीआई, आर्टिफिसियल् इण्टेलिजेन्स्, स्टार्ट्-अप् इत्येतान् शिक्षां नवान्वेषणम् च समेत्य आङ्किकीय-सार्वजनिक-अवसंरचनायां सहयोगस्य वर्धनाय अपि बलं प्रदत्तवान्। तत्पूर्वं, प्रधानमन्त्री मोदी जकार्ता-नगरे इण्डोनेशिया-देशस्य राष्ट्रपतिना प्रबोवो सुबियान्तो इत्यनेन सह प्रतिनिधिमण्डल-स्तरीय-वार्तां कृतवान्। उभयनेतृभ्यां परस्पर-हितस्य क्षेत्रेषु सहयोगं वर्धयितुं ज्ञापनपत्राणाम् आदानप्रदानम् अपि कृतम्। श्रीमोदी वर्याय एकस्मिन् समारोहे राष्ट्रपतिना प्रबोवो सुबियान्तो इत्यनेन इण्डोनेशिया-गणराज्यस्य सर्वोच्च-नागरिकपुरस्कारं 'बिन्ताङ्ग आदिपूर्णा' इति प्रदत्ता।

### हरदीप सिंह पुरी

शिलातैल-प्राकृतिक-वातेन्धनमन्त्री हरदीप सिंह पुरी अवदत् यत्, यदि अन्ताराष्ट्रियस्तरे अशोधित-तैलस्य मूल्यानि स्थिरानि उत वा न्यूनानि भवन्ति तर्हि आन्तरिक-पेट्रोल्-डीज़ल् इत्येतयोः मूल्यानि सकारात्मकदिशि प्रवर्धन्ते इति अपेक्षास्ति। मन्त्री विश्वासं प्रकटितवान् यत् उपभोक्तृभ्यः दृक्पथः अनुकूलः एव अस्ति यतः वैश्विक-तैल-वातेन्धन-आपूर्तिः निरन्तरं विस्तृता अस्ति इति। नवदिल्ल्याम् अस्य वर्षस्य विकसित-भारत-शिखरसम्मेलनं सम्बोधयन् श्री पुरी अवदत् यत्, भारतेन अद्यतनीयेषु दशकेषु वैश्विकोर्जा-व्यवधानानां कूटनीतिक-संवादस्य, समयोचित-नीतिगत-हस्तक्षेपस्य, देशीयोत्पादन-वर्धनस्य, आयातस्य विविधीकरणस्य च संयोजनमाध्यमेन सफलतया समधानम् अकरोत् इति।

### विदेशमन्त्री

विदेशमन्त्री डॉ. एस्. जयशङ्करः अवदत् यत् भारत-बहरीन-सहभागित्वं निरन्तरं गहनं भवति इति। डॉ. जयशङ्करः ह्यः बहरीन्-देशस्य द्विदिवसीययात्रायाः समापनम् अकरोत्। यात्रावधौ डॉ. जयशङ्करः बहरीन्-देशस्य युवराजस्य तथा प्रधानमन्त्री राजकुमारस्य सलमान्-बिन्-हमद्-अल्-खलीफा इत्यस्य उपस्थितौ तत्रत्य राज्ञा हमद्-बिन्-इसा-अल्-खलीफा इत्यनेन सह मिलितवान्। असौ उपप्रधानमन्त्रिणा शेख्-खालिद्-बिन्-अब्दुल्ला-अल्-खलीफा इत्यनेन सह अपि मेलनं कृतवान्। एतासु सभासु विदेशमन्त्री राष्ट्रपतिपदासीना द्रौपदी मुर्मु, प्रधानमन्त्री नरेन्द्रमोदी चेत्येतयोः पक्षतः शुभकामनाः प्रेषितवान् तथा बहरीन्-देशेन सह दीर्घकालिकं मैत्रीपूर्णं च द्विपाक्षिक-सहभागित्वं इतोऽपि गहनं कर्तुं भारतस्य प्रतिबद्धतां पुनः सुदृढीकृतवान्। बहरीन्-देशे भारतीयसमुदायस्य सुरक्षायै कल्याणाय च तत्रत्य नेतृत्वं प्रति कृतज्ञतां प्रकटितवान्।

### एल्-निनो

प्रधानमन्त्री-कार्यालयेन विविधक्षेत्रेषु एल्-निनो इत्यस्य सम्भाव्यप्रभावानां, सज्जतोपायानां च समीक्षार्थं प्रधानमन्त्री-कार्यालये उच्च-स्तरीय-समीक्षा-सभा आयोजिता। प्रधानमन्त्रिणः प्रधानसचिवस्य डा. पी. के. मिश्रवर्यस्य अध्यक्षतायां सेवातीर्थे ह्यः इयं सभा आयोजिता। अस्यां सभायां पञ्चदशतोप्यधिकानां मन्त्रालयानां सचिवाः वरिष्ठाधिकारिणः च उपस्थिताः आसन्। श्रीमिश्रः निर्दिष्टवान् यत् समग्र-स्थितेः निरीक्षणं निरन्तरं भवेत् तथा च प्रावृट्कालस्य उत वा विलम्बित-प्रावृट्कालस्य प्रभावानां दुर्बल-मण्डलेषु राज्यैः सह समन्वयेन मूल्याङ्कनं करणीयम्, येन आवश्यकतानुसारम् उद्धारकार्यं भूयात्।

## फीफा

फुट्बाल्-क्रीडायां स्विट्ज़र्लैण्ड्-देशः वेन्कूवर्-नगरे पेनाल्टी-शूट्-आउट्-इत्येतस्यां क्रीडायां कोलम्बिया-देशं चत्वारि-त्रीणि इत्यङ्कान्तरालेन पराजित्य चतुःपञ्चाशदधिक-ऊनविंशति-शत-तमात् वर्षात् प्रथमवारं फीफा-विश्वकप्-क्रीडायाः प्रागुपान्त्यचक्रे प्रविष्टवान्। अन्यस्यां राउण्ड्-आफ्-16 इत्येतस्यां क्रीडायां अट्लाण्टा-नगरे अर्जेण्टीना-दलेन ईजिप्ट्-दलं त्रीणि-द्वे इत्यङ्कान्तरालेन पराजितम्।

## क्रिकेट्

पुरुष-क्रिकेट्-क्रीडायां, गतरात्रौ नाटिङ्घम् नगरे ट्रेण्ट् ब्रिड्ज् इत्यत्र तृतीये विंशति-प्रतिविंशति-अन्ताराष्ट्रिय-द्वन्द्वे इङ्ग्लैण्ड्-दलेन भारतदलं पञ्चविंशत्य-धिकैकशत -धावनाङ्कैः पराजितम्।

।। इति वार्ताः।।